# संस्कृत-वार्ताः

दिनाङ्कः-09/12/2025 सायम् - 06:20

## आदौ मुख्यवार्ताः

- लोकसभायां निर्वाचन-परिष्कार-विषये, एस्. आई. आर्. तथा वी. वी. पैट-विषये चर्चा प्रचलति।
- सर्वोच्चन्यायालयेन बी. एल्. ओ. तथा अन्याधिकारिणः प्रति भयाक्रान्त-प्रकरणं गम्भीरतया लक्षितम्, तथा च निर्वाचन-आयोगम् एतादृशानि प्रकरणानि स्वस्य दृष्ट्याम् आनेतुं आदिष्टम्।
- राष्ट्रपतिः द्रौपदीमुर्मुः अद्य नवदिल्ल्यां त्रयोविंशत्यधिक-द्विसहस्र, चतुर्विंशत्यधिक-द्विसहस्र-वर्षयोः राष्ट्रिय-हस्तशिल्प-पुरस्कारान् वितरितवती।
- भारतस्य रमेशबाबु प्रज्ञानानन्देन, पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य फिडे-सर्किट्-स्पर्धा विजिता।

## लोकसभा-निर्वाचन-चर्चा

लोकसभायां निर्वाचन-परिष्कार-विषये, एस्. आई. आर्. तथा वी. वी. पैट उपाय-विषये च चर्चा समारब्धा। चर्चायाः आरम्भं कुर्वन्, काङ्ग्रेस्-दलस्य नेता मनीष तिवारी इत्येषः अवदत् यत्, निर्वाचन-आयोगेन एस्. आई. आर्. इत्यस्य आचरणस्य कारणानि अवश्यमेव वक्तव्यानि। सः अवदत् यत्, देशस्य अनेकेषु राज्येषु एस्. आई. आर्. प्रक्रिया प्रचलति, परञ्च निर्वाचन-आयोगस्य समीपे एस्. आई. आर्. इत्यस्य आयोजनस्य वैधानिकाधारः नास्ति। श्रीतिवारिणा उक्तं यत् संविधाने मतदातृ-सूच्यां विशेष-गहन-संशोधनस्य व्यवस्था नास्तीति।

## सर्वोच्चन्यायालयः-भ्याक्रान्तः

सर्वोच्चन्यायालये मुख्यन्यायाधीशः सूर्यकान्तः, न्यायाधीशः जॉयमाल्य बाग्ची इत्येतयोः पीठेन अद्य पश्चिम-बङ्ग-प्रदेशे तथा अन्येषु राज्येषु एस्. आई. आर्. 2.0 इत्यस्यां प्रक्रियायां संलग्नाः बी. एल्. ओ. तथा अन्याधिकारिणः प्रति भयाक्रान्त-प्रकरणं गम्भीरतया लक्षितम्, तथा च निर्वाचन-आयोगं एतादृशानि प्रकरणानि स्वस्य दृष्ट्याम् आनेतुम् आदिष्टम्।

## अमितशाहः-वन्देमातरम्

केन्द्रीय-गृह-मन्त्री अमितशाहः अवदत् यत् संसदि वंदे मातरम् गीतस्य उपरि चर्चया भावी-संततयः तस्य वास्तविकं महत्त्वं वैभवं च अवगन्तुं समर्थाः भविष्यन्ति। सः अवदत् यत् राष्ट्रगीतं वंदे मातरम् देशभक्तेः, त्यागस्य, राष्ट्रिय-चेतनायाः च प्रतीक अभवत्, येन स्वातन्त्र्य-आन्दोलनस्य मार्गः प्रशस्तः अभवत्। अद्य राज्यसभायां वंदे मातरम् गीतस्य सार्धैकशततमे वार्षिकोत्सवे

चर्चायाः आरम्भः कुर्वन् श्रीशाहः अवदत् यत्, एषा अमरकृति भारतमातरं प्रति कर्तव्यस्य भक्तेः च भावं प्रज्वालयति। सः अवदत् यत्, स्वतन्त्रता-सङ्ग्रामस्य समये वंदे मातरम् आवश्यकम् आसीत्, अद्यत्वे अपि अस्ति यदा देशः सप्तचत्वारिंशदधिक द्विसहस्रतमे वर्षे भारतं विकसितं भविष्यति। मन्त्रिणा उक्तं यत्, स्वातन्त्र्य-योद्धारः प्रत्येकस्य समागमस्य आरम्भः वंदे मातरम् गीतेन एव क्रियन्ते स्म, अद्य यदा वीरसैनिकाः सीमायां सर्वोच्च- बलिदानं कुर्वन्ति, तदा ते वंदे मातरम् एव गायन्ति।

<u>राष्ट्रिय-हस्तशिल्प-पुरस्काराः</u>

राष्ट्रपतिपदासिना द्रौपदी मुर्मुः अद्य नवदिल्ल्यां त्रयोविंशत्यधिक-द्विसहस्र, चतुर्विंशत्यधिक-द्विसहस्र-वर्षयोः राष्ट्रिय-हस्तशिल्प-पुरस्कारान् वितरितवती। एताः प्रतिष्ठिताः राष्ट्रिय-सम्मानाः असाधारण-कलात्मक-प्रभुत्वस्य उत्सवम् आचरन्ति, तथा च भारतस्य समृद्धस्य विविधतायाः च हस्तशिल्प-परम्परायाः संरक्षण-प्रचाराणां च कृते प्रशासनस्य प्रतिबद्धताम् प्रदर्शयन्ति।

उपस्थित जनसमूहं सम्बोधयन्ती राष्ट्रपतिः प्रोक्तवती यत् कला भिन्न-संस्कृतिभिः सह जनान् परस्परं संयोजयति। सा अवदत् यत् हस्तशिल्पं न केवलं सांस्कृतिकः परिचयः, अपितु जनानां जीविकायाः महत्त्वपूर्णः अङ्गोपि अस्ति।

राष्ट्रपतिः अस्मिन् विषये बलं प्रदत्तवती यत् हस्तशिल्प-क्षेत्राणां कार्यबले अष्टषष्टिः प्रतिशतं यावत् महिलाः एव सन्ति, अस्य क्षेत्रस्य विकासः महिला-शक्तीकरणं अपि सुनिश्चितं करिष्यति।

प्रायः द्वादश शिल्पकाराः त्रयोविंशत्यधिक-द्विसहस्र, चतुर्विंशत्यधिक-द्विसहस्र-वर्षयोः शिल्पगुरु-पुरस्कारं प्राप्तवन्तः तत्रैव षट्-त्रिंशत् शिल्पकाराः उभयोः वर्षयोः राष्ट्रिय-पुरस्कारैः सम्मानिताः अभवन्।

<u>शिवराजसिंहः-खाद्यान्नम्</u>

प्रशासनम् अद्य संसूचितवान् यत् अस्मिन् वर्षे देशे खाद्यान्न उत्पादनं सप्ततिलक्षाधिक पञ्चत्रिंशत्कोटि टन-परिमितादधिकं यावत् अभवत्, यत् गतवर्षस्य अपेक्षया सप्त-दशमलव-पञ्चषष्टि-प्रतिशतं यावत् अधिकम् अस्ति। लोकसभायाम् अनुपूरक-प्रश्नस्य प्रत्युत्तरे केन्द्रीय-कृषि-कृषक-कल्याणमन्त्री शिवराजसिंह-चौहानः अवदत् यत् कृषकाणां परिश्रमात् केन्द्र-सर्वकारस्य नीतिभिश्च माध्यमेन एव एतत् सम्भवम् अभवत्। सः अवदत् यत् चतुर्विंशत्यधिक-द्विसहस्र, पञ्चविंशत्यधिक-द्विसहस्र-वर्षे देशे सर्वाधिकं सस्योत्पादनं जातम्। श्री-चौहानः सूचितवान् यत् चतुर्दशाधिक-द्विसहस्र-पञ्चदशाधिक-द्विसहस्र-वर्षस्य अपेक्षया खाद्यान्नस्य उत्पादने प्रायः एकचत्वारिंशत्-दशमलव-चतुर्नवतिः-प्रतिशतं यावत् वृद्धिः अभवदिति।

## एन्. डी. ए. संसदीय-उपवेशनम्

अद्य नवदिल्ल्यां संसदभवन-परिसरे एन्. डी. ए. संसदीय-दलस्य सभा आयोजिता। प्रधानमन्त्री नरेन्द्र मोदी, गृहमन्त्री अमित शाहः, रक्षामंत्री राजनाथसिंहः, भाजपाध्यक्षः जे. पी. नड्डाः, सूचना-प्रसारणमन्त्री अश्विनी वैष्णवः, विदेशमन्त्री डा. एस् जयशङ्करः, जनता दल-यूनाईटेड सदस्यः सञ्जय झाः, राष्ट्रीयलोकमोर्चा प्रमुखः उपेन्द्र कुशवाहा, एन्. सी. पी. सदस्यः प्रफुल्ल पटेलः इत्यादयः एन्. डी. ए. पक्षस्य सदस्याः सभायाम् उपस्थिताः आसन्। सभायां, बिहारविधानसभानिर्वाचने प्राप्त विजयाय एन्. डी. ए. सदस्याः प्रधानमन्त्रिणः मोदिनः अभिनन्दनं कृतवन्तः। सभायाः अनन्तरं वार्ताहरैः सह वार्तालापं कुर्वन् संसदीयकार्यमन्त्री किरेन रिजिजुः अवदत् यत्, सभायां प्रधानमन्त्रिणा एन्. डी. ए. नेतॄन् देशस्य विकासाय द्रुतगत्या कार्यं कर्तुम् आदिष्टम्।

## नायडु-इण्डिगो

केन्द्रीय-नागरिक-उड्डयन-मन्त्रिणा श्री-राममोहन-नायडुना अद्य प्रोक्तम् यत् इण्डिगो-संस्थायां सद्यः उत्पन्न-समाह्वानानां निवारणं शीघ्रमेव भविष्यति, अपि च सुदृढ-विमानयान-व्यवस्थायाः निर्माणे पुनरुद्घाटने च प्रशासनं पूर्णतया प्रतिबद्धः अस्ति। लोकसभायां इण्डिगो-सङ्कट- विषये मन्त्री अवदत् यत् इण्डिगो-संस्था एव पूर्ण रूपेण दोषि अस्ति।

मन्त्रिणा निगदितम् यत् डी.जी.सी.ए. विमान-संस्थाम् प्रति निर्देशाः प्रदत्ताः, यत् तस्य प्रतिवेदनस्य आधारेण एव कठोराचरणं भविष्यति। श्री-नायडुः अवदत् यत् यावत् स्थितिः सामान्यतां न प्राप्नोति तावत् प्रशासनं पूर्णतया जगरुकः भूत्वा कार्यं करिष्यति।

## ऋतु-विभागः

भारत-ऋतु-विज्ञान-विभागेन अद्य छत्तीसगढे, मध्यप्रदेशे, ओडिशायाम्, पंजाबे, तेलङ्गाना राज्ये, विदर्भे च शीतलहर्याः पूर्वानुमानं कृतम्। विभागेन अद्य असम, मेघालय, पूर्वी-उत्तरप्रदेश, नागालैण्ड, मणिपुर, मिजोरम्, त्रिपुरा ओडिशा-प्रदेशेषु च निहारस्य संभावना प्रकटिता।

## आई. पी. एल्.

बी. सी. सी. आई. इत्यनेन षड्विंशत्यधिक द्विसहस्रतम वर्षस्य आई. पी. एल. क्रीडायाः क्रीडकानां विक्रयणाय अन्तिमासूची लोकार्पिता। अस्मिन् मासे षोडश दिनाङ्के आबुधाबी-नगरे आयोक्ष्यमाणे अस्मिन् कार्यक्रमे चत्वारिंशदधिक द्विशतं यावत् भारतीय क्रीडकाः दशाधिकैकशतं यावत् वैदेशीयाः क्रीडकाः च चिताः सन्ति।

फिडे-सर्किट्-स्पर्धा

भारतस्य रमेशबाबु प्रज्ञानानन्दः, पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य फिडे-सर्किट्-स्पर्धा विजितवान्, स: देशस्य एकमात्रः पुरुष- क्रीडकः अभवत् येन षड्विंशत्यधिक द्विसहस्रतम वर्षस्य कैंडिडेट्स-स्पर्धायां स्वीय स्थानं सुनिश्चितम्।

।। इति वार्ताः ।।